# Jabali Upanishad

# જાબાલ્યુપનિષત્

## Document Information

Text title : Jabali Upanishad

File name : jabali.itx

Category : upanishhat, shiva

Location : doc_upanishhat

Author : Vedic Tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 104 / 108; Sama Veda - Shaiva upanishad

Latest update : April, 19, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 1, 2025

*sanskritdocuments.org*

# જાબાલ્યુપનિષત્

જાબાલ્યુપનિષદ્વેદ્યપદતત્ત્વસ્વરૂપકમ્ ।
પારમૈશ્વર્યવિભવં રામચન્દ્રપદં ભજે ॥

ૐ આપ્યાયન્તુ મામાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં
બ્રહ્મોપનિષદં માહં બ્રહ્મ નિરાકુર્યાં મા મા
બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં મેસ્તુ
તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથ હૈનં ભગવન્તં જાબાલિં પૈપ્પલાદિઃ
પપ્રચ્છ ભગવન્મે બ્રૂહિ પરમતત્ત્વરહસ્યમ્ । કિં
તત્ત્વં કો જીવઃ કઃ પશુઃ ક ઈશઃ કો મોક્ષોપાય ઇતિ ।
સ તં હોવાચ સાધુ પૃષ્ટં સર્વં નિવેદયામિ
યથાજ્ઞાતમિતિ । પુનઃ સ તમુવાચ કુતસ્ત્વયા જ્ઞાતમિતિ ।
પુનઃ સ તમુવાચ ષડાનનાદિતિ । પુનઃ સ તમુવાચ
તેનાથ કુતો જ્ઞાતમિતિ । પુનઃ સ તમુવાચ તેનેશાનાદિતિ ।
પુનઃ સ તમુવાચ કથં તસ્માત્તેન જ્ઞાતમિતિ । પુનઃ સ
તમુવાચ તદુ[પાસનાદિતિ । પુનઃ સ તમુવાચ ભગવન્કૃપયા
મે સરહસ્યં સર્વં નિવેદયેતિ । સ તેન પૃષ્ટઃ સર્વં
નિવેદયામાસ તત્ત્વમ્ । પશુપતિરહઙ્કારાવિષ્ટઃ
સંસારી જીવઃ સ એવ પશુઃ । સર્વજ્ઞઃ પઞ્ચકૃત્યસમ્પન્નઃ
સર્વેશ્વર ઈશઃ પશુપતિઃ । કે પશવ ઇતિ પુનઃ સ તમુવાચ જીવાઃ
પશવ ઉક્તાઃ । તત્પતિત્વાત્પશુપતિઃ । સ પુનસ્તં હોવાચ કથં
જીવાઃ પશવ ઇતિ । કથં તત્પતિરિતિ । સ તમુવાચ યથા તૃણાશિનો
વિવેકહીનાઃ પરપ્રેષ્યાઃ કૃષ્યાદિકર્મસુ નિયુક્તાઃ

સકલદુઃખસહાઃ સ્વસ્વામિબધ્યમાના ગવાદયઃ પશવઃ ।
યથા તત્સ્વામિન ઇવ સર્વજ્ઞ ઈશઃ પશુપતિઃ । તજ્જ્ઞાનં
કેનોપાયેન જાયતે । પુનઃ સ તમુવાચ વિભૂતિધારણાદેવ ।
તત્પ્રકારઃ કથમિતિ । કુત્રકુત્ર ધાર્યમ્ । પુનઃ સ તમુવાચ
સદ્યોજાતાદિપઞ્ચબ્રહ્મમન્ત્રૈર્ભસ્મ સંગૃહ્યાગ્નિરિતિ
ભસ્મેત્યનેનાભિમન્ત્ર્ય માનસ્તોક ઇતિ સમુદ્ધૃત્ય જલેન
સંસૃજ્ય ત્ર્યાયુપમિતિ શિરોલલાટવક્ષઃસ્કન્ધેષ્વિતિ
તિસૃભિસ્ત્ર્યાયુપૈસ્ત્રિયમ્બકૈસ્તિસ્રો રેખાઃ પ્રકુર્વીત ।
વ્રતમેતચ્છામ્ભવં સર્વેષુ વેદેષુ વેદવાદિભિરુક્તં
ભવતિ । તત્સમાચરેન્મુમુક્ષુર્ન પુનર્ભવાય । અથ
સનત્કુમારઃ પ્રમાણં પૃચ્છતિ । ત્રિપુણ્ડ્રધારણસ્ય
ત્રિધઃ રેખા આલલાટાદાચક્ષુષોરાભ્રુવોર્મધ્યતશ્ચ ।
યાસ્ય પ્રથમા રેખા સા ગાર્હપત્યશ્ચાકારો રજો ભૂર્લોકઃ
સ્વાત્મા ક્રિયાશક્તિઃ ઋગ્વેદઃ પ્રાતઃસવનં પ્રજાપતિર્દેવો
દેવતેતિ । યાસ્ય દ્વિતીયા રેખા સા દક્ષિણાગ્નિરુકારઃ
સત્વમન્તરિક્ષમન્તરાત્મા ચેચ્છાશક્તિર્યજુર્વેદો
માધ્યન્દિનસવનં વિષ્ણુર્દેવો દેવતેતિ । યાસ્ય તૃતીયા રેખા
સાહવનીયો મકારસ્તમો દ્યૌર્લોકઃ પરમાત્મા જ્ઞાનશક્તિઃ
સામવેદસ્તૃતીયસવનં મહાદેવો દેવતેતિ ત્રિપુણ્ડ્રં ભસ્મના
કરોતિ । યો વિદ્વાન્બ્રહ્મચારી ગૃહી વાનપ્રસ્થો યતિર્વા સ
મહાપાતકોપપાતકેભ્યઃ પૂતો ભવતિ । સ સર્વાન્દેવાન્ધ્યાતો
ભવતિ । સ સર્વેષુ તીર્થેષુ સ્નાતો ભવતિ । સ સકલરુદ્રમન્ત્રજાપી
ભવતિ । ન સ પુનરાવર્તતે ન સ પુનરાવર્તતે ॥ ઇતિ । ૐ સત્યમિત્યુપનિષત્ ॥

ૐ આપ્યાયન્તુ મામાઙ્ગાનિ વાક્પ્રાણશ્ચક્ષુઃ
શ્રોત્રમથો બલમિન્દ્રિયાણિ ચ ॥ સર્વાણિ સર્વં
બ્રહ્મોપનિષદં માહં બ્રહ્મ નિરાકુર્યાં મા મા
બ્રહ્મ નિરાકરોદનિરાકરણમસ્ત્વનિરાકરણં મેસ્તુ
તદાત્મનિ નિરતે ય ઉપનિષત્સુ ધર્માસ્તે મયિ સન્તુ તે મયિ સન્તુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥ હરિઃ ૐ તત્સત્ ॥

ઇતિ શ્રીજાબાલ્યુપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Jabali Upanishad*

pdf was typeset on April 1, 2025

Please send corrections to *sanskrit@cheerful.com*